Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 3 | ISSN : 2581- 6306

# व्यञ्जनाविमर्शः



**डॉ. विजय कुमार मिश्र**
**सहायकाचार्यः/ व्याकरणविभागः**
**म.अ.रमेश्वरलता संस्कृत महाविद्यालयः,**
**दरभंगा, भारत।**

**सारांश-** व्यंजना शक्तिमूला शक्तौ,लक्षणमूला च लक्षणायामेव यदि अंतर्भूता स्यात्, तर्हि स्वंत्रता कथं स्यादिति चेत्, उच्यते- 'राज्त्युभाल्ल्भः' इत्यादौ अप्रकारणिकद्वितियार्थबोधा-न्निश्कम्पम् प्रवृत्यभावेन तस्यास्वादविशेषजनकत्वेन च तत्र वैजात्यमवश्यं वाच्यामिति तस्य बोधस्य कारणविशेषनेव सिद्धिर्वाच्या स्यादिति व्यंजन्स्याख्या वृत्तिरियम् अवश्यमङ्गीकरणीया प्रेक्षावृद्भिः | अत एव व्यंजनामात्रं शक्त्या न गतार्थिकतुम् शक्यते| किंचव्यंजना सहृदयमात्रसंवेद्या, शक्तिस्तु तदन्यैरपि इति बोद्धृभेदाद् द्व्योर्भेदः| 'गतोऽस्तमर्कः' इत्यादौ शक्योऽर्थः एक एव व्यंग्यस्तु अनेक इति प्रतिपाद्यसंख्याभेदः| शक्यार्थः शब्दोच्चारणमात्रेण बोध्यते, व्यंगस्तु प्रतिभावैशद्येन इति कारणभेदः| एवमेव कार्यप्रतीतिकालाश्रयविषयादीनामपि भेदाध्भेदः| तथा च शक्तेर्ज्ञानं शब्दे हेतुः, व्यंजना तु स्वरूपसती अपि इति महान् भेद इति सा शक्तावन्तर्भावयितुम् न शक्या नापि च लक्षानायाम् गथार्था एषा|
**मुख्य शब्दः -** व्यंजना, शक्ति, लक्षणा, वृत्ति, शक्यार्थः,शब्दः अर्थःप्रयोजनः।

शक्तिवृत्तिनिरूपणानन्तरं व्यअनावृत्तिमृश्यते, व्याकरणदर्शने शब्दप्रमाणस्य प्राधान्यात् शब्दस्य च स्फोटरूपत्वात, स्फोटस्य च ध्वनिव्यङ्ग्यतत्वात्। अग्रे शक्त्यन्तर्भूतायाः लक्षणायाश्चापि स्वतन्त्रवृत्ति-त्वनये प्रत्याख्येयदृष्ट्या विमर्शः करिष्यते। शिष्यान् अध्याष्य गुरुर्वक्ति 'गतोऽस्तमर्कः' इति। अत्र वाक्यनिष्ठशक्तिसम्बन्धेन सूर्यकर्तृकं भूतकालिकमस्तं गमनमिति बोधः सम्पद्यते। किन्तु तद्बोधन सचेतसां चेतसि न तोषो जायते, अपि तु सन्ध्योपासनं विधेयमस्माभिरिति द्वितीयार्थबोधेनैव लभ्यते विश्रान्तिः। स चायं द्वितीयोऽर्थः उक्तवाक्येसम्बद्ध एव बोध्यते, असम्बद्धो वा? न तावदन्त्यः पक्षः असम्बद्धार्थबोधने ऽतिप्रसहो दुर्निवारः स्यात्, कस्याप्यर्थस्य बोधो भवतु नाम' को वारयेत्?। नाऽपि प्रथमः, सम्बन्धस्याद्यवधि अज्ञातत्वात् इति चेत्, उच्यते-यः किल सम्बन्धः श्रीमदभिरज्ञातः स व्यञ्जनाभिधोऽस्ति इति ज्ञायताम्। शब्दतदर्थयोरयं सम्बन्धो द्योत्यद्योतकभावव्यङ्ग्यव्यजकभावशब्दाभ्यामपि सकीर्तितो भवति। अयञ्च सम्बन्धो वाच्यवाचकभावरूपशक्तिसम्बन्धात्, लक्ष्यलक्षभभावरूपलक्षणासम्बन्धाच्च विलक्षण एवास्ति।
शक्यार्थसम्बद्धः, असम्बद्धो वा नानाविधोऽर्थो ऽनेन सम्बन्धेन बोध्यते। व्याकरणदर्शनस्य तु अयं

सम्बन्धः प्राणभूत एवास्ते, एनमन्तरा व्याकरणशास्त्रस्य सर्वस्वभूतस्फोटतत्वस्य प्रकाशनमेव न भविष्यति। उक्तं च श्रीव्याडिमहोदयेन -

**शब्दस्य ग्रहणे हेतु प्राकृतो ध्वनिरिष्यते।**

**स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते[1] ।।**

वाक्यपदीय श्रीभर्तृहरिणा च-'प्रत्येक व्यञ्जका वर्णा भिन्ना वाक्यपदेषु[2] ये', इत्युक्तम् । अत्र प्रथमयोक्त्या प्राकृतध्वनेः शब्दस्य (स्फोटस्य) व्यञ्जकत्वम्, वैकृतध्वनेः स्फोटस्य स्थितिविशेषे हेतुत्वं प्रतिपाद्यते। द्वितीययोक्त्या प्रत्येकं वर्णाः पदस्फोटं वाक्यस्फोटञ्च व्यञ्जयन्ति, अत्र वर्णपदेन प्राकृतध्वनिरेव गृह्यते। अत एव चोक्तम् 'प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते।' यतः प्राकृतध्वनिः स्फोटस्य व्यकः अतः तदीयो मात्रा द्विमात्रा त्रिमात्रात्मकः कालः स्फोअस्यारोपितः कालो भवति। स्फोटस्तु वस्तुतो दिग्देशकालाद्यनवच्छिन्न एव, विभुनोऽपरिमितत्वादनवच्छित्वाच्च।

आभ्यामुक्तिभ्यां ध्वनेर्व्यजकत्वं सुस्पष्टमायाति, उक्तश्च ध्वनिगता व्यंजनावृत्तिः स्वीकार्या। अनया व्यजनया स्फोटस्य

स्वरूपमपि व्यक्तं भवति, अतः स्फोटरूपव्यग्येन सह ध्वनिरूप व्यञ्जकस्य व्यङ्ग्यव्यजकभावसम्बन्धः सुसम्पन्नो भवति। परन्तु अनया व्यअनया पदार्थबोधो वाक्यार्थबोधो वा न भवति, अर्थस्य बोधस्तु स्फोटनैव प्रकाशितेन भवति इति जिज्ञासायां तदपि तत्वं शाब्दिकैरभ्युपेयते सवस्फोटोऽपि अर्थस्य व्यञ्जको भवति इति। व्यजनायां प्रमाणम्

प्रमाणं चात्र-'उपसर्गाः क्रियायोगे' इति सूत्रीयं भाष्यम्। तत्र हि क्रियायोग इत्यनेन क्रियया सहोपसर्गस्यायं व्यङ्ग्य व्यंजकभावसम्बन्ध एवाभिप्रेतो भगवतः सूत्रकारस्य न तु वाच्यवाचकभावः, स तु क्रियया सह धातोरेव[3]।" किं च 'भूवादय' इति सूत्रीयमपि भाष्यम् अस्ति प्रमाणभूतम्। तथा हि क्रियाविशेषक उपसर्गः पचतीति क्रिया गम्यते तो प्रत्युपसर्गो विशिनष्टि, इत्युक्तं भाष्यकृता। उद्द्योतकारेण चैवं व्याख्यातम्-'क्रियाविशेषक उपसर्ग इति यथाऽन्वयव्यतिरेकाभ्यां प्रत्ययोऽर्थबोधकः, तथा ताभ्यामेव क्रियागतविशेषद्योतक उपसर्गः क्रियावाचो धातुरेवेति भावः'[4] इति। अत्र क्रियाविशेषक उपसर्गः, क्रियागतविशेषद्योतक इत्यर्थः। एवं च क्रियाविशेषस्यद्योत्यता, उपसर्गस्य द्योतकता स्पष्टं लभ्यते। क्रियोपसर्गयोः द्योत्यद्योतकभावसम्बन्धः सुतरामनुभूयते।

किं च भूवादय इति सूचस्य कियावाचिनोभ्वादयो धातुसंज्ञाःस्युः' इत्यर्थे क्रियाचाचिन इत्यशीव्यानावृत्तिमहिम्नैव लब्धः, अन्यथा 'वादयोभ्वादयो थातुसंज्ञाः, इति प्रथमाकक्षा ततश्च आदिशब्दस्य प्रकारवाचितया चा प्रकारा भ्वादयो धातुसंज्ञाः, इति द्वितीया कक्षाः ततः प्रकारशब्दस्य सदशार्थकत्वेन वासदृशा भ्वादयो धातुसंज्ञा इति तृतीया कक्षा, ततश्च प्रतियोगितावच्छेदकव्यापकीभूतधर्मेण सादृश्यं गृह्यते इति नियमबलेन क्रियावाचिनो भ्वादय इत्यादि लभ्यते, प्रतियोगितावच्छेदककत्वव्यापकीभूतेन क्रियावाचित्वेन सादृश्यस्य ग्रहणात्। इदं च क्रियावाचित्वं न शक्त्या लब्धुं शक्यम्-वादिपदस्य तत्र शक्तेरभावात्, नाऽपि लक्षणया प्राप्तव्यः, लक्षणायाः शाब्दिकमते भावात्। नाऽपि शक्यतावच्छेदकस्यारोपः कर्क शक्यः, मुख्यार्थस्य बाधितस्थले एव तदौचित्यात्, प्रकृते वा सदृशरूपोवादिशब्दस्य मुख्योऽर्थस्तस्य भ्वाद्यर्थे ऽवयबाधो नास्ति इति कृत्वा व्यअनावृत्तिरेव शरणम् ईदृशार्थबोधने। अयमर्थो न प्रभाविषयतामधिरोहति इति तु न वाच्यम्, भगवता भाष्यकृतै- वास्यार्थस्य

महता संरम्भेण बोधितत्वात्[5]। अपिचात्रैव सूत्रे शब्दतः स्फुट व्यञ्जनायाः समर्थन क्रियते। भाष्यकारेण- 'अथवानान्तरेण क्रियां भूतभविष्यद् वर्तमानकाला व्यज्यन्ते'[6] इति अत्र व्यज्यन्ते इत्यस्य व्यञ्जनया बोध्यन्ते- इत्यर्थः सुस्पष्टं प्रतीयते।

एवमेव-'आरोपितत्वं'-'नद्योत्यम्,[7] 'द्योतकाः प्रादयो येन[8] इत्यादिकया भट्टोजिदीक्षितोक्त्या, वैयाकरणसिद्धान्तलघु मन्जूषायामेतत्समर्थने श्रीनागोजिभट्टोक्त्या,[9] किं च 'व्यर्थं सद् यद्यत्सूत्रं पदं वा ज्ञानकमुच्यते, तत्सर्व व्यञ्जकत्वमेव शब्दप्रमाण पर्यालोचनायाम्' - इति भैरवसमिश्रोक्त्या[10] च एषा व्यन्जनाख्या वत्तिः प्रतिपदं समाद्रियते शाब्दिकैः। अस्याः स्वीकारे कलाटीकाकर्तृ श्रीबालभट्टानां युक्तयः -

लघुमन्जूषायाः कलाटीकायां श्रीबालभट्टा एतत्समर्थने बह्वीर्युक्तीः उपस्थापयामासुः- तथाहि यत्तु 'गतोऽस्तमर्कः', इत्यादौ न व्यन्जना प्रतिष्ठां लब्धं योग्या, एकसम्बन्धिज्ञानादपर सम्बन्धिस्मरणवत् स्मृतिरेव तं तमर्थ विषयोकरिष्यति इति, तन्नरमणीयतामर्हति, उक्तवाक्यश्रवणोत्तर सन्ध्यावन्दनं कर्तव्यमिति मया स्मृतम्- इत्यनव्यवसायो न भवति, तत्त उल्लेखोऽपि न भवति स्मृतौ तु तत्तोल्लेख आवश्यकः। इदं पदं वाक्यं वा एतदर्थस्य न वाचकम् ना लक्षकम् नाऽपि-स्मारकम्, अपि तु व्यन्जनया बोधकमिति प्रामाणिकव्यवहारेण शक्त्यादिव्यतिरिक्ताया व्यञ्जनया अभ्युपगमाच्च। मुख्यार्थासम्बद्धस्याऽपि अनया बोधदर्शनाच्च'[11] इति। अस्या स्वरूपनिर्वचने श्रीनागोजिभट्टानां विलक्षणं कृत्यम् -

सिद्धान्तलघुमन्जूषायामेतत्स्वरूपणावसरे संस्कारविशेषी व्यन्जना', इत्यूचिरे श्रीनागोजिभट्टाः। संस्कारे- विशेषस्त्रिधा उक्तस्तैः। तथा च यथा लक्षणाया मुख्यार्थबाधग्रहपूर्वकमेव बोधो भवति, तथाऽत्र न भवति, मुख्यार्थस्य बाधग्रहोभवतु वा न भवतु, अन्यथा तु बोधो जायते एवेति मुख्यार्थबाधग्रहनिरपेक्षबोधजनकत्वं संस्कारे प्रथमो विशेषः। लक्षणया तु मुख्यार्थसम्बद्धस्यैव अप्रसिद्धस्यैव वा बोधी भवति, अनया तु सनियमो न समाद्रियते इति मुख्यार्थ सम्बद्धासम्बद्धसाधारण प्रसिद्धाप्रसिद्धार्थ विषयकत्वमुक्तसंस्कारे द्वितीयो विशेषः। उक्तसंस्कारस्योद् बुद्धानुबुद्धात्वसाधारण्ये सर्वत्रैव सर्वेषामनया बोधः कथं न भवति। इत्यतिप्रसक्तिनिवारणाय वक्त्रादिवैशिष्ट्यज्ञानस्यैतजन्यबोधे सहका रिताऽभ्युपेयते इति वाक्त्रादिवैशिष्ट्यज्ञान-प्रतिभायुबुद्धत्वमपि तत्र तृतीयो विशेषः इति।[12]

किंचिदत्र विचार्य्यते एषा संस्कारविशेषरूपा व्यङजना न्यायदर्शने समवायसम्बधेतात्मनि तिष्ठेत्, वेदान्तदर्शने तादात्म्य- सम्बन्धेनान्तःकरणे निवत्स्यति- इति शब्दतदर्थयो समयोरपि अविद्यमानतया तयोरस्याः कथं सम्बन्धता स्यात्, सम्बन्धस्योभयवृत्तित्वनियमात् ।[13] अस्यां परिस्थितौन्यायशास्त्रा भ्युपगतायाः इच्छायाः शक्तित्वजीकारे तस्याः पदपदार्थयोः सम्बन्धत्वाभावरूपे दूषणं पूर्वं भवद्भिरेवोभाक्तिं तार्किकानां शिरस्सु स एव दोषोऽधुनोक्तसंस्कारस्य वृत्तित्वसमर्थकानां भवतां शिरस्यपि आपतितः कथं दूरीकर्तुं शक्य इत्यहो विलक्षण कृत्यं भवताम् मान्यवराणाम्। उक्तविषये समन्वय-प्रकारः -

व्यङ्ग्यव्योंकभावसम्बन्ध रूपैव व्यन्जना मन्तव्या, संस्कारविशेषस्य तु तज्ज्ञापकतया तस्मिन् ज्ञापके हेतौ व्यन्जनापदस्य व्यवहारो लक्षणाया, अप्रसिद्धशक्या वा अनुभूयते च क्वचित्कार्ये क्वचिच्च कारणे एकस्यैव शब्दस्य प्रयोगः। यथा शक्यसम्बन्धरूपे कारणे लक्षणापदस्य व्यवहारो भवति न्यायशास्त्रे, शक्यताऽवद कारोपात्मके तत्फले लक्षणाशब्दस्य प्रयोगो भवति व्याकरणशास्त्रे उच्यते च स्वयमपि-'द्योतकत्वं च क्वचित् समभिव्याहृतपदीय शक्तिव्यञ्जकत्वम्',[14] इति।

एतेनोक्तस्य व्यङ्ग्यव्यङकभावसम्बन्धस्य व्यञ्जना पदेन ग्रहणां शब्दस्थले स्पष्टं सूचितमस्ति। अपि च-यथा दोषे प्रकाशकत्वशकतावपि घटाधिभिः संयोगसम्भंधे सत्येव तस्याश्चरितार्था वक्तुं शक्या, नान्यथा, तथैव शब्दे व्यंग्य-व्यंजकभाव सत्येऽपि अर्थेन सह तद्भिन्नस्य सदृशसंस्कार- विशेषविषयत्वस्य सत्त्येव तंचरिथार्था| उक्तं च 'उपकारः स यत्राऽसि धर्मस्तत्रानुगम्यते' इति |[15] ननु अर्थबोधात प्राक कथमस्य व्यंगव्यन्जक भावसम्भंधस्य ज्ञानम्| एतज्ज्ञानमन्तरा च कथमर्थवेशेशकः शाब्दाबोधः इति चेत,अत्रोच्यते वाच्यावाचकभावसम्भन्धवदस्याऽपयनादीतया दोषाऽभावात| एतंच पद्विषयकव्यंजनाविषये, वाक्यगता व्यंजना तू स्वरूपसतो एव शाब्दभोधजनिका, वाकयनिष्ठशक्तिसम्भंद्वत|[16] अत एवोक्तं कलाकृदिभः - 'व्यंजनास्वरूपसती हेतुः'[17] इति |

**सन्दर्भ-**


1. वा. प. 1/76 ह. बृ. टीकायामुद्धीताकारिका |
2. वा. प. 1/88
3. म. भा. 1/4/59
4. म. भा. उ. टी. 1/3/1
5. म. भा. 1/3/1
6. म. भा. 1/3/1
7. वै.भू.सा. कारि. ४40
8. तत्रैव 42
9. वै. सि. ल. म. र. युता. पृ. 133
10. भैर. परि. शे. टी.1 प्रक.
11. वै. सि. ल. म. क. टी. पृ.163
12. वे. सि. ल. म. र. प्र. युता. पृ.133
13.वै. सि. ल. म. र. प्र. युता, शक्तनि. पृ.17
14. वै. सि. ल. म. व्य. निरू.
15. वा. प, 3/3/6
16.वे. भू. सा. स्फोटनिरू. कारि.66 पृ. 267
17. वे. सि. ल. म. क. टी. पृ. 161